
# ऊर्द्ध्वपुण्ड्रमार्तण्डः



॥ श्रीगणेशायनमः ॥ श्रीकृष्णाय नमः ॥ ॐ
नमः श्रीमदाचार्यचरणाब्जरजोरुचे। ऊर्द्ध्व-
पुण्ड्रं वैष्णवानां दण्डाकारं विराजते ॥१॥ नू-
न्विदमविचारचारु ॥ यतो वैष्णवानामूर्द्ध्व-
पुण्ड्रधारणं विहितं यत्तद्गोपीचन्दनेनेति वा-
सुदेवोपनिषदि बहुषु पुराणेषु श्रवणात्
गन्धादिना धारणस्य। नच गन्धादिभिर्धार्य-
मिति नच भागवतः कुर्यादूर्द्ध्वपुण्ड्रममृत्ति-
कमिति च रामानुजाचार्यमतीयप्रमाण सं-
ग्रहधृतपुराण वचनान्निषेधस्य जागरूक-
त्वेन श्यामं शान्तिकरं प्रोक्तं रक्तं वश्यकरं
तथा श्रीकरं पीतमित्याहुर्वैष्णवं श्वेतमुच्य-
ते इति ब्रह्माण्डवाक्येन चान्येषां वर्णा-
नां सकामत्वेन वैष्णवस्य श्वेतवर्णगोपी-
चन्दनादेर्मृदो धारणमुचितमिति चेदत्र वदा

मः। किं गोपीचन्दनादीनां धारणस्य नित्यत्वमुत काम्यत्वं किंच गोपीचन्दनादीनां माहात्म्यं भगवदीयत्वेनोत स्वतः किंच गन्धादि धारणनिषेधो भगवदुपभुक्तेतरगन्धपरः उत सामान्यपरः। तत्र नाद्यः धर्मप्रवृत्तौ स्मृतिसारसमुच्चये अभ्यंगे सूतके चैव विवाहे पुत्रजन्मनि मांगल्येषु च सर्वेषु न धार्यं गोपिचन्दनमिति निषेधात् गोमतीतीरसंभूतां-गोपीदेहसमुद्भवां मृदं मूर्ध्नी वहेद् यस्तु सर्वपापैः प्रमुच्यत इति मदनपारिजाते सत्यतपोवाक्येन सर्वपापनिवृत्तिकामनाया उक्तेश्च। द्वितीये त्विष्टापत्तिर्न। काम्यापेक्षया नित्यस्य बलीयस्त्वात्। तृतीये गोपीचन्दनादीनां भगवत्प्रसादरूपत्वेन धारणेतु भगवत्प्रसादीयद्रव्य एव विधेस्तात्पर्येण न तवेष्टसिद्धिः अत एव वासुदेवोपनिषदि गोपीचन्दनस्य भगवदुपभुक्तगन्धत्वेनोक्तिः तथाहि ॐ नमस्कृत्य भगवान्नारदः सर्वेश्वरं वासुदेवं पप्रच्छ भगवन्नूर्द्ध्वपुण्ड्रविधिं द्रव्य मन्त्रस्थानादिसहितं मे ब्रूहीति तं होवाच भगवान्वासुदेवो वैकुंठस्थानोद्भवं मम प्रीतिकरं मद्भक्तैर्ब्रह्मादिभिर्धारितं विष्णुचन्दनं वैकुण्ठादाहृत्य द्वारकायां मया प्रति-

ष्ठितं गोपीभिः प्रक्षालनाद्गोपीचन्दनम् । अ-
थ गोपीचन्दनं नमस्कृत्योद्धृत्य गोपीचन्दन
पापघ्न विष्णुदेहसमुद्भव चक्रांकित नमस्तु-
भ्यं धारणान्मुक्तिदो भव इमं मे गंगेति ज-
लमादाय विष्णोर्नुकमिति मर्दयेत् अतो दे-
वा अवन्तु न इत्येताभिर्विष्णुगायत्र्या च त्रि-
वारमभिमंत्र्य शंखचक्रगदापाणे द्वारकानि-
लयाच्युत गोविन्द पुण्डरीकाक्षं रक्ष मा श-
रणागतमिति मां ध्यात्वा गृहस्थो ललाटादि-
षु द्वादशस्थानेषु अनामिकयांगुल्या विष्णु-
गायत्र्या केशवादिद्वादशनामभिर्वा धारयेत्
ब्रह्मचारी वानप्रस्थो वा ललाटकंठहृदयबा-
हुमूलेषु वैष्णव्या गायत्र्या कृष्णादिपञ्चनाम
भिर्वा धारयेत् यतिस्तु तर्जन्या शिरोललाट-
हृदयेषु प्रणवेन धारयेत् ब्रह्मादयस्त्रयोमूर्त-
यस्तिस्रो व्याहृतयस्त्रीणि छन्दांसि त्रयो वेदा
स्त्रयोज्योतिषाः ऽतस्य त्रयः कालास्तिस्रो ऽव-
स्थास्त्रय आत्मनो गुणास्त्रय ऊर्द्ध्वाः अका-
रोकारमकारा एते सर्वे प्रणवमयोर्ध्वपुण्ड्रत्र-
यात्मकाः तदेतदोमित्येकत्वं संभावयन् परम
हंसो ललाटे प्रणवेनैकमूर्द्ध्वपुण्ड्रं धारयेदिति
धारणमुक्त्वा तत्र दीपेत्यारभ्य भावनामुक्त्वा
गोपीचन्दनमाहात्म्यमप्युक्त्वा गोपीचन्दना-

भावे तुलसीमूलमृत्तिकां मुमुक्षुर्धारयेन्नित्य-
मपरोक्षात्मसिद्धये गोपीचन्दनलिप्तांगो देहस्था
नं च तस्य यः अस्थीनि चक्ररूपाणि भवं-
त्येव दिने दिने अथ रात्रावग्निहोत्रभस्मना
अग्नेर्भस्मासि इदं विष्णुस्त्रीणि पदेति मन्त्रैः
र्विष्णुगायत्र्या प्रणवेनोद्धूलनपरो नरो वर्त्तते
तद्विष्णोः परमं पदं कुर्यादेवं विधिना गोपी
चन्दनं यो धारयेत् यस्त्वेतदधीत इत्यारभ्यो-
पनिषत्पाठमहिमानमुद्धाटये तद्विष्णोः परमंप-
दमिति मन्त्रान्ते समाप्तिमजनीयमुपनिषत्
अत्र भगवता ब्रह्मादिभिः समर्पितभगवदु-
पभुक्तस्य गन्धस्य गोपीचन्दनत्वेन भगवदु-
पभुक्तगन्धधारणे तात्पर्यात्। अथ ग्रहिल-
वादमङ्गीकृत्य गोपीचन्दने एव तात्पर्यमु-
क्तत्वाद्दूषे तर्हि अथ रात्रावग्निहोत्रभस्मने-
त्यादिना भस्मोद्धूलनस्याप्यापत्तेः। तथाच
ब्राह्मणः कुलजो विद्वान् भस्मधारी भवेद्यदि
वर्जयेत्तादृशं देवि मद्योच्छिष्टं यथा घटमिति
पाद्मवचनविरोधापत्तेः। एवं च अत्रत्यभस्मो-
द्धूलनस्य क्षत्रियादिपरत्वेन शैवागमदीक्षित-
परत्वेन स्नात्वा पुंड्रं मृदा कुर्याद्धूत्वा चैव तु
भस्मनेति स्मृत्या केवलस्मार्तपरत्वेन चाग्नि-
रित्यादिना भस्म गृहीत्वा विमृज्यांगानि संस्पृ-

शोदिति प्रकारक व्रतमेतत्पाशुपतं पशुपाशविमोक्षाये त्यथर्वशिरसि निरूपितत्वात्तात्पर्यमुन्नीयते तदेव भवतो भद्रं भवेन्नतु वाच्यतयेति जानीहि। भस्मधारणनिषेधविचारस्तु श्रीमत्पुरुषोत्तमैरुर्द्धपुंड्रधारणवादे निरूपितत्वान्नेह तन्यते। अग्निहोत्राद्यंगतया धारणं तु विन्दुमात्रमेव न तु त्रिपुंड्रं भस्मना सदेति ब्रह्मांडवाक्येन विप्राणां नैव धार्यं स्यात्तिर्यक् पुंड्रादिकं तथा नारायणाज्जगन्नाथा दन्येषामर्चनं न तु इति त्रिपुंड्रं शूद्रकल्पानां शूद्राणां च विधीयते त्रिपुंड्रधारणाद्विप्रः पतितः स्यान्न संशय इति पाद्मोत्तरखंडीयोर्द्धपुंड्राध्याय वाक्यात्। एवंच गोपीचन्दन धारणमहिमा भगवदुपभुक्तगन्धतात्पर्यं वर्णयतीति सिद्धं अत एव श्रीभागवते त्वयोपभुक्तस्त्रग्गन्धवासोलंकारचर्चिताः उच्छिष्टभोजिनो दासास्तव मायां जयेमहिइति परमभक्तस्योद्धवस्य वचनं गीयते एतेन श्रीरंगे व्यंकटाद्रौ च श्री कूर्मद्वारके शुभे प्रयागे नारसिंहाद्रौ वाराहे तुलसीवने गृहीत्वा मृत्तिकां भक्त्या विष्णुपादजलैः सह धृत्वा पुण्ड्राणि चांगेषु विष्णु सायुज्यमाप्नुयात् पर्वताग्रे नदीतीरे बिल्वमूले जलाशये सिंधुतीरे हरिक्षेत्रे विष्णुपादोद-

काश्चिते पुण्ड्राणां धारणार्थाय गृह्णीयात्तत्र मृत्तिकां अभावे तूदकेनापि पुण्ड्रं वै तत्समाचरेत् इत्यादिपाद्मवचनैर्मृद्ग्रहणमुदितं तत्र भगवत्संबंधेनैव तासां मृदामुत्कर्षो न स्वत इति साक्षादग्रगन्धधारणे किमु वक्तव्यं अतश्चतुर्थपक्षोपि न। असमर्पितवस्तूनां तस्माद्वर्जनमाचरेदिति निषेधात् अत एव गंधादिधारणनिषेधस्य पञ्चपक्षोक्तत्व एव विश्रान्तेः। भगवदीयपदार्थस्य निषेधे त्वयोपभुक्तेत्यादिना संपादितदासधर्मत्वहानेर्न षष्ठः। एतेन न च गंधादिभिर्धार्यमिति वचनं व्याख्यातं त्वयोपभुक्तेत्यादिवचसा भगवत्प्रसादेतरगन्धधारणनिषेधतात्पर्यस्य जागरूकत्वात् एवं सति पूर्णाः पुलिंद्य उरुगायपदाब्जरागश्रीकुंकुमेन दयितास्तनमंडितेन तद्दर्शनस्मररुजस्तृणरूषितेन लिंपंत्य आननकुचेषु जहुस्तदाधिमिति श्रीभागवतवचसा सर्वसाधनरहितानां पुलिंदीनां चरणयुगलनलिनकुंकुमसंबन्धमात्रेण मनोभवव्याधित्यागस्य भगवत्प्राप्त्या च पूर्णत्वस्य प्रतिपादनेन भगवद्भक्तानां भगवत्प्रसादकुंकुमेनोर्द्ध्वपुण्ड्रधारणस्यावश्यकत्वमवसीयते बृहद्वामनपुराणे भगवच्चरणांभोजकुंकुमस्य सुलेपनात् सर्वधर्मविहीनानां पु-

लिंदीनां विना श्रमं श्रीकृष्णप्राप्तिरेवाभूज्जहु
राधिं मनोभवां तस्मात्सर्वप्रयत्नेन कुंकुमेन सु-
गंधिना पुंड्राणि रचयेद्धीमान् ललाटादिषु वै-
क्रमात् ऊर्द्ध्वपुण्ड्रं कौंकुमं तु यः कुर्याद्भक्तितो
नरः स स्नातः सर्वतीर्थेषु सर्वयज्ञेषु दीक्षितः
दत्तानि सर्वदानानि तस्य तुष्टो हरिः स्वयमि-
ति अत्र कुंकुमधारणमुदितं तस्य वर्णस्तु शो
णएव तथैव रमाननाभं नवकुंकुमारुणमिति
श्रीभागवतपद्ये कुंकुमस्यारुण्यवर्णत्वोक्तेः। त-
त्रैव श्रीमदाचार्यचरणैरवादि अरुणगुणो हि
रागप्रधान इति। एवं च भगवत्यनुरागसूचक
मारुण्यगुणयुतकुंकुमस्य धारणं तथैव श्री
प्रभुचरणाः नमः श्रीकृष्णपादाब्जतलकुंकुम
पंकयोः रुचे यदरुणं शश्वन्मामकं हृदयाबुज
मित्युक्तवंतः अत एव स्वमार्गेभगवदुपभुक्ता
रुणगुणककुंकुमरचितस्योर्द्ध्वपुण्ड्रस्य शिष्टा-
चारो जरीजृंभते। तथाच ऋग्वेदे चतुर्दश ऋ-
गात्मके ऋभुदैवत्ये सूक्ते दशमी ऋक् श्रोणा-
मेकदकं गामवाजति मांसमेकः पिंशति सू-
नया भृतः आनिम्रुचः शकृदेको अपाभरत्
किं स्वित्पुत्रेभ्यः पितरावुपावतुरिति। अस्या-
र्थस्तु श्रुतिरहस्यप्रकाशे निरूपितो मच्छात्रेण
ऽप्युच्यते हे ऋभवः भवतां मध्ये एकः श्रोणां

आरक्तां असमर्पितवस्तूनां तस्माद्वर्जनमाचरे
दिति वाक्यात् भगवदुपभुक्तारुणकुंकुमं ऊ-
र्द्ध्वपुण्ड्रमृजुं शोणं दंडाकारं सुशोभनं कौंकुमं
यस्य भाले तु स वै भागवतोत्तम इति पाद्मे उ-
त्सवे वासुदेवस्य भुक्तशेषं तु कुंकुमं अरुणं ते-
न कुर्याद्वै दंडाकारोर्द्ध्वपुंड्रकमिति बृहन्मनुस्मृ-
तौ हारिद्रेणारुणेनैव कृष्णभुक्तेन पुंड्रकं कृ-
त्वा कर्म सुकुर्वीत तच्चानंत्याय कल्पत इति
भविष्यपुराणे ऊर्द्ध्वपुंड्रं द्विजः कृत्वा रक्तं कुंकु
मसंभवं हरिनामाक्षरयुतं सेवां कुर्याद्धरेर्द्वि-
जा इति बृहद्वामने पूर्वा दाल्हताग्रे वक्ष्यमाण
वचस्सु च वर्णितां कुंकुमादिरूपां मुख्यकर्मभू-
तां प्रति उदकं जलं गौणं कर्म अवाजति अ-
वगमयति अंतर्भावितण्यर्थोयं एवं च श्रो-
णामारक्तवर्णांगां कुंकुमादिरूपां उदकेन मि-
श्रयतीत्यर्थः सूनया हिंसया आभृतं आहृतं
मांसं गोरोचनाख्यं पिंशति पिनष्टि उदकेनेति
शेषः गोरोचनं अन्यत्सुगन्धिद्रव्यस्याप्युपल-
क्षकं आनिम्लुचः नितरामस्तं मच्छनो दग्धें ध
नस्याग्निसंबंधेन शकृत् शुष्कगोमयोत्थं भस्मे-
ति यावत् व्रतमेतत्पाशुपतमिति जावालश्रु-
तिः पाशुपततन्त्रादिशिवप्रतिपादकपुराणवा-
क्यादिभिश्च भस्मधारणं शैवपरं अग्निहोत्राद्यं

गं वा एवं च शैवः अग्निहोत्रकर्ता वा अपाभ-
रत् आहृतवान् अत्राप्युदकेनेति शेषः व्यवहि
ताश्चेति छंदसि व्यवहितेनाप्युपसर्गेण क्रिया
संबन्धः हृग्रहोर्भश्छंदसीति हस्य भः एतानि
मन्त्रपदानि असंपूर्णार्थत्वात् स्वात्मलाभाय
ब्राह्मणमपेक्षन्ते इषेत्वोर्जेत्वादि मन्त्रवत् तत्र
यथा इषेत्वेति शाखामाच्छिनत्ति ऊर्जेत्वेत्यनु
मार्ष्टीति ब्राह्मणानुसारात् हे शाखे त्वा त्वां इ-
षे आछिंदन् प्राप्तिवपशुभ्यः अनुमानीति
व्याख्यातं एवमिहापि वासुदेवोपनिषद्ब्राह्मण
तन्त्रपुराणोपबृंहणानुसारादूर्द्ध्वपुंड्रार्थे आरक्तां
मृदं चन्दनादिरूपां जलेनाभिश्रयेदिति व्याख्ये-
य अत्र शिष्टाचारं प्रमाणयंति किंस्वित्पुत्रे-
भ्यः पितरावुपावतुरिति पुत्रहितार्थं यत्किं-
चित् व्रतं पितरौ मातापितरौ वा पितृपिताम-
हौ वा पितराविति पदं शिष्टानामुपलक्षकं
यद्यदाचरति श्रेष्ठ इति वाक्यात् उपेत्य स्वी
कृत्य अवतुः सम्यक्परिपालयामासतुः त-
देवं तस्य पुत्रस्य श्रेयस्साधनमित्यर्थः श्री-
मत्पुरुषोत्तमचरणैरियमेव श्रुतिरूर्द्ध्वपुण्ड्रवादे
शिष्टाचाररक्षार्थमुपन्यस्तेति व्याख्याता तेनैव-
नीलकंठचतुर्धरेण भारतटीकायामूर्द्ध्वपुंड्रपर-
त्वेन व्याख्याता एतेन साधूनां समयश्चापि प्र-

माणं वेदवद्वेदितव्यमिति वाक्यमपि संगृही-
तमतः पुराणादिभिः सिद्धं शिष्टाचारेण श्रुत्या-
च भगवत्प्रसादारुणकुंकुमस्योर्द्ध्वपुंड्रादिधा-
रणं विधेयमिति। न च श्यामं शांतिकरं प्रोक्तं
रक्तं वश्यकरं तथेति वाक्यादरुणगुणस्य ग-
न्धस्य सकामत्वमिति वाच्यं ऊर्द्ध्वपुण्ड्रमृजुं
शोणं दंडाकारं सुशोभनं कौंकुमं यस्य भाले
तु सवै भागवतोत्तमइति पाद्मात् उत्सवे वासु-
देवस्य भुक्तशेषं सुकुंकुमं अरुणं तेन कुर्या-
द्यो दंडाकारोर्द्ध्वपुंड्रकं तस्योपरि प्रसन्नः स्यात्सा-
क्षाद्देवकिनंदनः अरुणं कौंकुमं पुंड्रं यस्य भा-
ले न दृश्यते सर्वधर्मयुतो वापि विष्णुद्रोही
स उच्यत इति बृहन्मनोर्वाक्याच्च हारिद्रेणारु-
णेनैव कृष्णभुक्तेन पुण्ड्रकं कृत्वा कर्म सुकु-
र्वीत तच्चानंत्याय कल्पत इति भविष्याच्च
तस्य तुष्टो हरिःस्वयमिति बृहद्वामनाच्च अरु-
णगुणविशिष्टोर्द्ध्वपुंड्रधारणं शिष्टानां नित्यमे-
व अधिकं प्रविष्टमतद्धानेरिति न्यायेन वश्या-
दिफलदमप्यस्त्विति वक्तव्या यथा मत्सेवया
प्रतीतं च सांलोक्यादिचतुष्टयं नेच्छति सेव-
या पूर्णाः किमन्यत्कालविप्लुतं किमलभ्यं
भगवति प्रसन्ने श्रीनिकेतने तथापि तत्प-
रा राजन्न हि वांछंति किंचन सालोक्यसार्ष्टि

सारूप्यसायुज्यैक्यत्वमप्युत दीयमानं नगृ-
ह्णंति विना मत्सेवनं जना इति श्रीभागवतवा-
क्यैर्भगवत्सेवया प्राप्तानां सालोक्यादिनां त्यक्तत्वे-
न भगवत्सेवया अपि न सकामत्वापत्तिः भक्ता
नां कामनाया अभावात् एवं प्रकृतेपि वश्यत्व
स्योक्तत्वेपि कामनाया अभावेन न सकामत्वं
अन्यथा गोपीचंदनस्यापि तथात्वापत्तेः किं च
वासुदेवोपनिषदि गृहस्थोललाटादिषु द्वादश
स्थानेषु अनामिक्यांगुल्याविष्णुगायत्र्या के-
शवादिद्वादशनामभिर्वाधारयेदिति अनामिकां-
गुल्या धारणस्योदितत्वेन तस्यास्तु अंगुष्ठः पु-
ष्टिदः प्रोक्तो मध्यमायुष्करी भवेत् अनामिका-
न्नदा नित्यं मुक्तिदा च प्रदेशिनीति ब्रह्मांड
वाक्येनान्नदातृत्वकामनाया उदिततया सकाम-
त्वापात इति मदुक्तिरेव तत्र युक्तिमतीति वि-
चारणीयं न च न च भागवतः कुर्याद्दूर्ध्वपुंड्र-
ममृत्तिकमिति वाक्यात् नेदं सांप्रतमिति वाच्यं
अमृत्तिकमित्यत्र नपुंसकलिङ्गेन बहुव्रीहिस-
मासबोधनेन नास्ति मृत्तिका यस्मिन् तदमृत्तिक
मिति व्युत्पत्त्या श्रीगोपीजनतः पश्चाद्वल्लभायेति
नामिकां मुद्रां गोपीमृदा धत्ते पुंड्रमध्ये स वैष्ण-
वइति भविष्यपुराणवाक्याद्धरिनामाक्षरयुतं भाले
गोपीमृदांकितमिति वाक्याच्च श्रीगोपीजनवल्लभा

येत्यक्षरसंततिं दंडाकारोर्द्ध्वपुंड्रे तु कुर्याद्गो-
पीमृदा शुभामिति पाद्माच्च उर्द्ध्वपुंड्रं ललाटे
तु कौंकुमं शोणरोचिषं मध्ये गोपीजनायेति-
श्रीपूर्णेन मृदांचितं येषां ते वैष्णवा ज्ञेया
नात्र नेया ममांतिकमिति बृहद्वामने यमस्य
वाक्याच्च मृत्तिकाभिः प्रशस्ताभी राधाकृष्णा
ह्वयांकिता मुद्रा यस्य सुभाले च तस्य तुष्टो
हरिः स्वयं हरिनामाक्षरशुभां मुद्रां गोपीमृ-
दा चरेत् पुंड्रमध्ये वैष्णवस्तु भगवत्प्रीतये द्वि-
जा इति ब्रह्मांडवाक्याच्च गोपीचंदनमृत्स्ना-
भिर्लिखिते यस्य विग्रहे शंखचक्रगदापद्मं
तस्य देहे वसाम्यहमिति स्कांदे मार्गशीर्षमा-
हात्म्ये वचनतश्च गोपीचंदनतो नित्यं चिह्नितो य-
स्य विग्रहः शंखचक्रगदापद्मैर्देहे तस्य सदा
हरिः कृष्णायुधांकितं यस्य गोपीचंदनमृत्स्न
या प्रयागादिषु तीर्थेषु स गत्वा किं करिष्यती-
ति पाद्मवचनाभ्यां च श्रीगोपीजनपूर्वं तु व-
ल्लभायेति मुद्रिकां उर्द्ध्वपुंड्रस्य मध्ये तु धार-
येद्गोपिकामृदा चक्रादिकं ततो धार्यं ततस्से-
वां समाचरेदिति वचनेन चोर्द्ध्वपुंड्रं मृदा भग-
वन्नामांकितं कार्यं नतु तद्राहितमित्यभिप्रा-
यात् किं च विशेषतो गोपीचंदनादिना धारण-
स्य द्व्यंगुलचतुरंगुलपरिणाहोर्द्ध्वपुंड्रस्य च वि-

धानं तन्मध्ये हारिद्रश्रीधारणं च तप्तमुद्राप्र-
करणे पठितत्वेन तत्परमिति बोध्यं एतेन प-
राशरसंहितायां आदाय वैष्णवक्षेत्रान्मृत्तिकां
विमलां सितां मूलमंत्रेणाभिमंत्र्य ऊर्द्ध्वपुंड्राणि
धारयेत्॥ ललाटादिषु चांगेषु केशवादीन्यथा
क्रमं द्व्यंगुलं त्र्यंगुलं वापि सांतरालं प्रकल्पयेत्
पार्श्वेअंगुलमात्रंतु ऊर्द्ध्वपुंड्रस्य धारणमिति कृ-
ष्णमंत्रकल्पे मृदैव वैष्णवः कुर्यादभावे चंदने-
न वा न भस्मना कदाचिच्च ऊर्द्ध्वपुंड्रं समाच-
रेत् मार्कंडेये ऊर्द्ध्व पुंड्रं मृदा कार्यं विप्रेण ब्रह्म
वादिना॥ ऊद्धृतासीति मंत्रेण वैष्णवेन विशे-
षतः नारदीये मृद्द्रव्यं प्रथमं श्रेष्ठं तत्र कारण
मुच्यते अश्वक्रांते रथक्रांते विष्णुक्रांते वसुंध-
रे शिरसा धारिता देवि रक्षस्वेत्यादिना स्फुटं।
प्रत्यक्षश्रुतिरित्याह तस्माच्छ्रेष्ठैव मृत्तिका ब्रह्मां
डे पर्वताग्रे नदीतीरे ममक्षेत्रे विशेषतः सिंधुती-
रेथ वल्मीके तुलसीमूलमाश्रिते मृद ऐताश्च
संग्राह्या वर्ज्याश्चान्यत्र मृत्तिकाः भरद्वाजः वि-
ष्णोरुद्धृतया क्षेत्रपर्वतादौ प्रशस्तया मृदोर्द्ध्व-
पुंड्रं देवानामन्यैर्वाच्छिद्रमेव वा पराशर संहि-
तायां यत्र दिव्यं हरिक्षेत्रं मृदमादाय तत्र वै
धारयेदूर्द्ध्वपुंड्राणि त्रिसंध्यासु द्विजोत्तमः नार
दीये श्वेता प्रधानतो ग्राह्या ऊर्द्ध्वपुंड्रस्य धारण

इति भरद्वाजः असंकलितया स्निग्धया तया श्लेक्ष्णया मृदा ऊर्द्ध्वपुंड्राणि साम्यानि मृदा सुरभिगंधया सचंदनादिभिर्द्रव्यै कर्तव्यं न कदाचन न मृद्भिश्चाप्रशस्ताभिरूर्द्ध्वपुंड्रं कदाचन तमसो रजसोगंधः गन्धःसत्वस्य मृत्तिका तस्मा द्भस्मादिभिर्नेच्छेदेकान्ते सिद्धिमात्मनः न च भागवतः कुर्यादूर्द्ध्वपुंड्रममृत्तिकं धारणादेव मृत्स्नायाः प्रीयते धरणीधर इत्यादि मृत्तिकाधारणविषयाणि ततो द्रव्यं च हारिद्रं सहेमतुलसीदलं मंत्रेण धारयेच्चूर्णं ललाटे मस्तके तथा मोक्षधर्मे विष्णुगात्राच्युत चूर्णं हारिद्रं धारयंति ये अपोह्य पातकान्याशु मोदंते दिवि देववत् ईश्वरसंहितायां सांतरालोर्द्ध्वपुंड्रस्य मध्ये श्रीशेषधामनि हरिद्रासारसंपूर्णां भक्त्या तां धारयेच्छ्रियं विष्णुदेहामृतं यत्र तच्चूर्णं शिरसा वहेत् सोऽश्वमेधफलं प्राप्य विष्णुलोके महीयते विष्णुधर्मोत्तरे। अभिषिक्तं हरेर्विंबे हरिद्राचूर्णमुत्तमं शिरसा धारयेद्यस्तु सोऽश्वमेधफलं लभेत् महाभारते विष्णुरूपेणसंस्पृष्टं यच्चूर्णं शिरसा वहेत् तस्याशुभानि नश्यंति मोक्षभागी भवेन्नरः नारदीये ऊर्द्ध्वपुंड्रस्य मध्ये तु लक्ष्मीस्थानं प्रकल्पयेत् हारिद्रेण तु चूर्णेन कुंकुमेन सुगंधिना पुंड्राणामंतराले तु

हारिद्रं धारयेच्छ्रियमित्यादिवचनानि श्रीनामक हरिद्राचूर्णधारणपराणि। रामानुजाचार्यमतीयप्रमाणसंग्रहे चक्रोल्लासादिग्रंथेषूपनिबद्धानि व्याख्यातानि तन्मतीयग्रंथधृते नतपःपुंड्रं तथा नाम मंत्रो यागश्च पञ्चमः अमी च पञ्चसंस्काराः परमैकांतिहेतव इति पाद्मवचसाऽत्रापि तत्तद्विधायकपुराणादिवाक्येषु तप्तमुद्राप्रकरण एव निरूपणात्तप्तमुद्राधारणं प्रत्येव विधानात् तप्तमुद्राधारणं तु वैखानसादितंत्रोक्तदीक्षावतां न वैदिकवैष्णवानां। श्रुतिरहस्यप्रकाशेप्ययमेव निर्णयः प्रतिपादितः। श्रुतिरहस्ये तु ऊर्द्ध्वपुंड्रस्य मध्ये तु विशाले सुमनोहरे सांतराले समासीनो हरिस्तत्र श्रिया सहेति वचनेन श्री धारणमपि न संभवति यतः श्रीगोपीजनवल्लभायेति मुद्राया एव धारणं संभवतीति निरूपितमस्माभिः। तत्प्रकाशे त्वेवं विवृतमस्मच्छात्रेण श्रीधारणं श्रियो हि चिह्नं श्रिया सह हरिस्समासीन इत्युक्त्वा श्रियस्तत्र सुतरां विद्यमानत्वेन निष्प्रयोजनत्वान्न धार्यमिति भाव इति। नारदीये भगवद्भक्तगंधेन यः कुर्यादूर्द्ध्वपुंड्रकं पूर्वजांस्तु समुद्धृत्य मोदते विष्णुसन्निधौ मृदादिना तु यत्पुंड्रं शूर्पाकारादिकं च यत् तत्तचक्रधरैस्तद्धि धार्यं नान्यैस्तु वैष्णवैः तप्त

चक्रधराणां हि धारणं हि श्रियो मुने पुण्ड्र
मध्ये निगदितं वैदिकानां न चैव हि पद्मपुरा-
णे श्रीधारणं न कर्तव्यं रजनीचूर्णसंभवं त-
प्तचक्रधरैस्तद्धि कार्यं नान्यैस्तु वैष्णवैः ऊर्ध्व
पुंड्रस्य मध्ये तु हरिनामाक्षरं शुभं मृदादिना
तु कर्तव्यं प्रीणामि जगदीश्वरः द्व्यंगुलं त्र्यं-
गुलं वापि चतुरंगुलमेव च मृदा पुंड्रं तप्त
चक्रधराणां तत्प्रकीर्तितं दंडाकारमृजुं शोणं
कृष्णाभुक्तेन निर्मितं गन्धेन प्रीयते कृष्णो य-
स्य भाले प्रदृश्यते ब्रह्मांडपुराणे अरुणं र-
जनीचूर्णं मत्पर्वादिषु मद्धृतं तेनोर्ध्वपुंड्रं कुर्व-
ति तेषां वै नास्ति पातकं कौंकुमं चोर्ध्वपुण्ड्रं
वै दृष्ट्वा निंदां करोति यः बौद्ध एव स विज्ञे-
यः सद्धर्मनिरतोपि च नाहं प्रसन्नः सकलाग-
मेषु शीलेषु नो कर्मकरेषु कंजभूः नो ब्रह्मच-
र्यादिधरेषु यद्वन्मकुंकुमेनांचितविग्रहे यथा इ-
त्यादिवचनकदंवेन तप्तमुद्राधारिभिरेव मृदा-
दिना द्व्यंगुलत्र्यंगुलादिपरीणाहयुतं मध्ये श्री
चिह्नचिह्नित मूर्ध्वपुंड्रधारणं कर्तव्यमिति सि-
द्धं एतेन मध्वाचार्याणामपि मते पूजांते भ-
गवदर्थसमर्पित धूपांगारादिलापनं तत्समकक्षं
ज्ञेयं धूपांगारादिकं यच्च पूजांते चोर्ध्वपुंड्रके
मृत्तिकाभिश्चोर्ध्वपुंड्रं तप्तमुद्रादिधारिणां विहि-

तं तांत्रिकाणां तद्वैदिकानां न कुत्रचित् धारणं तत्प्रशस्तं हि निबोध कमलोद्भवेति ब्रह्मांडात् शयिन्यां चैव बोधिन्यां तप्तमुद्रादिधारिणः ते धारयन्तस्तच्चिह्नं धूपागारोद्भवं शुभमिति पाद्मात् धूपागारसमुद्भूतं चिह्नं तांत्रिकवैष्णवैः तप्तमुद्राधरैरेव धार्यं नान्यैस्तु वैदिकैरिति स्कांदाच्चेति दिक्॥ ननु तप्तमुद्राधारणं तु ब्राह्मणानामवश्यं कार्यं यतः शंखचक्रविधानेन वह्निपूतो भवेन्नरः अतप्ततनूर्न तदामोऽश्नुते इति ऋग्वेदात् सहोवाच याज्ञवल्क्यस्तस्मात्पुमानात्महिताय हरिं भजेत् सुश्लोकमौलेर्वर्माण्यग्निना संदधत इति शतपथश्रुतेः प्रतद्विष्णो अब्जचक्रे सुतप्ते जन्मांभोधीनर्तवेच्चर्षणींद्रः मूलबाह्वोर्दधन्ये पुराणलिंगान्यंगे तप्तायुधान्अपातयेदिति सामवेदात् अग्निहोत्रं यथा नित्यं वेदस्याध्ययनं तथा ब्राह्मणस्य तथैवेदं तप्तमुद्रादिधारणम् शंखचक्रांकनं कुर्यादुभयोर्बाहुमूलयोः हुताग्निना तु संतप्य सर्वपापापनुत्तये वन्हिनैव तु संतप्तं चक्रमादाय वैष्णवः धारयेत्सर्ववर्णानां हरिसालोक्यकाम्ययेति पद्मपुराणात् अन्येषां पुराणवचनानामपि जागरूकत्वादिति चेत्॥ अत्र ब्रूमः यस्तु संतप्तशंखादिलिंगांकिततनुर्नृप स सर्व

यातनाभोगी चंडालो जन्मकोटिषु ये द्विजं त-
प्तशंखादिलिंगांकिततनुं नृप संभाष्य रौरवं याति
यावदिंद्राश्चतुर्दश चक्रांकिततनुर्यत्र तत्र कोपि
न संवसेत् यदि तिष्ठेन्महीपाल युज्यते ब्रह्म-
हत्यया गंगास्नानरतो वापि अश्वमेधरतोऽपि वा
चक्रांकिततनुं स्पृष्ट्वा रौरवं युगमश्नुते चक्रांकि-
ततनुं दृष्ट्वा पश्येत्सूर्यं स्मरेद्धरिं जपेच्च पौरुषं
सूक्तमन्यथा रौरवं व्रजेत् लिंगांकिततनुं दृष्ट्वा प-
श्येत्सूर्यं नरेश्वर जपेच्च शतरुद्रीयमन्यथा रौ-
रवं व्रजेत् ब्राह्मणस्य तनुर्ज्ञेया सर्वदेवसमाश्रि-
ता सा चेत्संतापिता राजन् किं वक्ष्यामि महैन-
सः चक्रांकिततनुर्वापि राजन् लिंगांकितोपि वा
नाधिकारी परिज्ञेयः श्रौतस्मार्तेषु कर्मसु इ-
ति बृहन्नारदीयपुराणवचनेभ्यः शंखचक्राद्यंकनं
तु नृत्यगीतादिकं तथा एकजातेरयं धर्मो न-
जातु स्याद्द्विजन्मनः यथा श्मशानजं काष्ठमनर्हं
सर्वकर्मसु तथा चक्रांकितो विप्रः सर्वकर्मविग-
र्हित इति विष्णुवचनात् शिवकेशवयोरंकान् शू-
लचक्रादिकान् द्विजः न धारयेत मतिमान्वैदि-
के वर्त्मनि स्थित इति आश्वलायनवचनाच्च
भट्टोजिदीक्षितैरपि तत्राधिकारिणो निरूप्य त-
प्तमुद्रा ह्यंत्यजानां हरिणा निर्मिता पुरा भूदेव
स्तप्तमुद्रां तु चिह्नं कृत्वा विमूढधीः इह ज-

न्मनि शूद्रः स्यान्मृतः श्वा चाभिजायत इति ब्रा-
ह्मदशमाध्यायवाक्यानि शृणु राम महाबाहो
लिंगचक्रादि धारिणां शूद्रधर्मरतानां हि तेषां ना-
स्ति पुनर्भवः विप्रस्यैतद्विगर्ह्यः स्यात्प्रायश्चित्त
मुदीरितमिति पाद्मवचनं शिवकेशवयोश्चिह्नं
शूलचक्रादिकं द्विजः न धारयेत मतिमान् वैदि
के वर्त्मनि स्थितः त्यक्तवेदिककर्माणो नास्ति-
का नटनर्त्तकाः ते धारयेयुश्चिह्नानि शिवयो
र्भिन्नबुद्धयः वेदाक्षरविहीनानां नास्तिकानां द्वि
जन्मनां विहितं धारणं नित्यं चिह्नानां केशवे-
शयोः तेषां भिन्नधियां किंचित्सूगत्यर्थं शिवः
पुरा कृपया तच्चकारेह पुराणेषु हितं च तदिति
आश्वलायनषष्ठाध्यायवाक्यानि वेदमूलतया
नित्यं प्रवृत्ता अपि सत्तम क्वचित्कदाचित्कर्तारं
तंत्रार्थं च ब्रुवंति वै क्वचित्तंत्रानुरोधेन धर्मं पौ-
राणिका अपि वदंति तादृशोंशस्तु ग्राह्यस्तंत्रा-
वलंबिना पुराणे धर्मशास्त्रे च योंशः श्रुत्या विरु-
ध्यते स तंत्रार्थस्तु विज्ञेयः समासेन मनीषिभि
रिति पराशरीयपुराणदशमाध्यायवाक्यानि तं-
त्रावलंबनेनैव पुराणानि च कानिचित् साक्षा-
द्वेदविरुद्धार्थं प्रवदंति क्वचित् क्वचित् अधि-
कारिविभेदेन नैव वेदपरं प्रतीति स्कांदवाक्यं
चोदाहृत्य अत एव वैदिकान्प्रति तप्तमुद्रादि

निषेधकं तद्धारणे प्रायश्चित्तविधायकं प्रायश्चि-
त्ताननुष्ठाने नरकादिबोधकवचनसहस्रं तत्र त-
त्रोपलभ्यत इति चोक्त्वा बृहन्नारदीयसूतसंहि-
ता वायवीयलैंगादित्याग्नेयकौर्ममानवोपपुराण-
वाक्यानि पूर्वोक्तविष्णुस्मृतिवाक्यं अंगेषु नांकये
द्विप्रो देवतायुधलांछनैः अंकयेद्यदि वा मोहात्प-
तत्येव न संशय इति शातातपीयम् रागसंद्वि-
ग्धगात्राणां न स्यात्पारत्रिकं शुभमिति हारी-
तं नांकनाय दहेद्देहं दहेद्देहोपकारतः नाधि
कुर्वंति दग्धांगाः श्रौतस्मार्तेषु कर्मस्विति बौधा-
यनीयं तादृशं पाद्मेपाराशरेमाधवीये चोक्तं भ्र-
ष्टादीनामेवागमोक्तदीक्षायामधिकारः तत्तमुद्रादि
विधिप्रशंसादिकमपि तद्विषयं निषेधास्तु वैदि-
कविषया इत्युक्तत्वाच्च तंत्रदीक्षायामधिकृतानामे
व तद्विधेर्जागरूकत्वात् तंत्रदीक्षाधिकृतास्तु
ब्राह्मणाद्भिन्नाः शूद्रादयः। तथाहि। श्रौतार्चनं
तु विप्राणां विशेषेण भवेत्सदा श्रौतागमार्चनं
क्षत्रे वैश्ये केवलमागममिति वाक्यात् तंत्रेषु
दीक्षितो मर्त्यो वैदिकं न स्पृशेत्सदा वैदिक
श्चापि तंत्रेषु दीक्षितं न स्पृशेत्सदेति वाशिष्ठ
लैंगोक्तेः क्वचित्तंत्रानुरोधेन धर्मं पौराणिका अपि
वदंति तादृशांशस्तु ग्राह्यस्तंत्रावलंबिनेति परा-
शरोक्तेः पराशरीयपुराणे प्रत्यक्षवेदसिद्धार्थः सं-

ग्राह्यः सर्वचेतनैः अप्रत्यक्षश्रुतेरर्थं स्मरंति मु-
निसत्तमाः स्मृतयश्च पुराणानि भारतप्रमुखान्य-
पि क्वचित्कदाचित्तंत्रार्थं कटाक्षेण मुनीश्वराः
अधिकारिविशेषाणां प्रवदंत्यर्थमास्तिकाः ब्राह्म-
णः क्षत्रियो वान्यो निःशंकं तत्परित्यजेत् व-
र्णाश्रमपरिभ्रष्टः प्रायश्चित्तेष्वनुन्मुखः वेदेतराग-
मं गत्वा पापी तद्धर्ममाचरेत् वेदबाह्यरताः स-
न्तो बहवो नरकं गता इति कौर्मपुराणेपि ब्राह्म-
णानां गौतमशापेन त्रयीबाह्यत्वे जाते तौस्तुतौ
शिवकेशवावित्युपक्रम्य चकारमोहशास्त्राणि
केशवः स शिवस्तथा कपालं लाकुलं वामं भैर-
वं पूर्वपश्चिमं पांचरात्रं पाशुपतं तथान्यानि स-
हस्रशः क्वचित् क्वचित्पुराणादौ वेदमूलेपि स-
र्वथा संति निर्मलतंत्रांशास्ते तु ग्राह्या न वैदि-
कैरित्यादिवाक्यानि नागोजीभट्टादिभिर्बहुभिर्ग्रं-
थकृद्भिरुपनिबद्धानि मच्छात्रेणापि शुद्धाद्वैतमा-
र्तंडप्रकाशे निरूपितानि। एवं च वैदिकानां न
तंत्रोक्तकर्मण्यधिकार इति सिद्धं। अथातप्ततनूर्न
तदामो अश्नुत इति श्रौतम् तप्तमुद्राधा-
रणमुच्यते एवेतितन्नैवं वाच्यं तप्तचक्रधारणवि-
योजकश्रुत्यन्तराभावात् विध्यभावात् यथा ऐं-
द्र्यागार्हपत्यमुपतिष्ठत इत्यत्र विधिनिरूपणं ए-
तद्विनियोगश्च पवित्रदर्भग्रंथे निरूपितः सर्वे-

वेदा यत्पदमामनंतीति वेदैश्च सर्वैरहमेव वेद्य इत्यादि श्रुतिस्मृतिषु प्रतिपादनात्पुरुषोत्तमपरत्वेनार्थोनिरूपणीयः। स तु श्रीमत्पुरुषोत्तमैः शंखचक्रवादे निरूपितः श्रीमदाराध्यचरणैः। मया तु श्रुतिरहस्ये भगवतो विप्रयोगात्मकस्वरूपपरत्वेन व्याख्याता। तत्प्रकाशे मच्छात्रेणापीयं श्रीमदाचार्यपरत्वेन व्याख्यातेति ततोवधेयं। सहोवाचेत्यारभ्य शतपथीयश्रुतेः प्रतद्विष्णो अब्जचक्र इत्यादिसामवेदश्रुतेरन्यासां च प्राचीननिबंधादिष्वनुपलभ्यमानत्वेनाप्रसिद्धत्वं एतसां समूलत्वेपीत्येतदर्थविचारादिकं इदमिति मुद्राधारणमार्तंडेनिरूपयिष्यामः। अन्यद्विशेषादिकं तत्रैव। श्रीमत्पुरुषोत्तमरचितशंखचक्रवादे शीतलमुद्राधारणस्यावश्यकत्वं पूजांगतायेति निरूपितं ततोवधेयं। श्रीमदाचार्यचरणैः शंखचक्रादिकं धार्यं मृदा पूजांगमेव तदिति निबंधे उदितं एतदावश्यकं मुद्राधारणमार्तंडे निरूपयिष्यत इति दिक्। प्रकृतमनुसरामः। एवं च तप्तचक्रधारिणामेव मृदादिना चतुरंगुलादिविस्तृतपुंड्रधारणं न तु वैष्णवानां वैदिकानां तेषां तु भगवत्प्रसादकुंकुमादीनां दंडाकारतिलकधारणं पूर्वोदाहृतवचनकदंबैर्निरूपितं बृहद्ब्रामनीयपुराणेपि तादृशोर्द्ध्वपुंड्रधारणमुदितं। तथाहि। ब्रह्मभृग्वादिसंवादे

भृग्वादयऊचुः चतुर्मुख नमस्तेऽस्तु गोपीमाहा-
त्म्यमुत्तमं श्रुतं त्वत्तोविस्तरशः कृपया कमलोद्भ-
व अधुना श्रोतुमिच्छामि वैष्णवानां यथोचितं
किंद्रव्यं तु किमाकारमूर्द्ध्वपुंड्रं विधीयते एतचि-
द्विस्तरतो ब्रूहि कृपया कमलासन भृग्वादीनां
वचः श्रुत्वा प्रत्युवाच प्रजापतिः ब्रह्मोवाच शृ-
णुध्वमूर्द्ध्वपुंड्रस्य।विधिं भूदेवसत्तमाः आदौ स्ना-
त्वा जलैः शुद्धैः परिधाय सुवाससी चरणोदक
संमिश्ररेणुमास्ये विनिक्षिपेत् नेत्रयोस्तस्य सं-
स्पर्शं कृत्वा शिरसि निक्षिपेत् निजाचार्यपदांभो-
जे नत्वा तु तिलकं चरेत् उत्सवे वासुदेवस्य भु-
क्तशेषं सुकुंकुमं हारिद्रमरुणं शुद्धं कुर्यात्तेनो-
र्द्ध्वपुंड्रकं अथवा भगवद्भुक्तचंदनं कुंकुमान्वितं
गृह्णीयादूर्द्ध्वपुंड्रार्थं जलेन तु विमर्द्दयेत् भग-
वच्चरणांभोजकुंकुमस्य सुलेपनात् सर्वधर्मविही
नानां पुलिंदीनां विना श्रमं श्रीकृष्णप्राप्तिरेवाभू-
ज्जहुराधिं मनोभवां तस्मात्सर्वप्रयत्नेन कुंकुमेन
सुगंधिना पुंड्राणि रचयेद्धीमान् ललाटादि यथा
क्रमं ऊर्द्ध्वपुंड्रं कौंकुमं तु यः कुर्याद्भक्तितो नरः
स स्नातः सर्वतीर्थेषु सर्वयज्ञेषु दीक्षितः दत्ता-
नि सर्वदानानि तस्य तुष्टो हरिः स्वयं ऊर्द्ध्वपुंड्रं
कौंकुमं तु ललाटादिषु यस्य वै दृश्यते मरणे
काले यमस्तस्मात्पलायते यमदूताः पलायंते ना-

त्र कार्या विचारणा स्वप्ने पि यमदूतान्वै नैव
पश्यंति वैष्णवाः अत्रैवोदाहराम्याद्य इतिहासं
पुरातनं विप्रोभूत्कीकटे देशे सर्वधर्मविवर्जितः
संध्यादिकर्मणा हीनश्चौर्यकर्मसु तत्परः राज्ञावा-
रत्रयं तस्य देशान्निष्कासनं कृत ततोसौ दक्षि-
णदिशं महारण्ये जगाम ह नाना पक्षिगणा
कीर्णे नानामृगनिषेविते सिंहव्याघ्रवराहादिग-
जादिगणसंकुले नानावृक्षलतागुल्मशोभिते नि-
र्जने शुभे तस्मिन्विवेश विप्रोसौ व्यालोलूकशि-
वाजिरे तालैस्तमालैर्हिंतालै रसालैः पनसैस्त-
था पिचुमंदैः कोविदारैराम्रैराम्नातकैरपि अ-
श्वत्थप्लुक्षन्यग्रोधतिंतिणीवीजपूरकैः नारिकेलै-
स्तु खर्जूरैः पीलुभिर्मंडिते वने तत्र शीतलपा-
नीयां नदीं पश्यन् गतक्लमः पुरोऽपश्यन्मनोहा-
रि मंदिरं श्रीहरेः शुभं तत्र गत्वा द्वारि देशे पति-
तं कुकुमं शुभं अरुणं रजनीचूर्णाज्जातं दृष्ट्वा द्वि-
जाधमः स्वललाटे धृतं तेन वभूवाथोर्द्ध्वपुंड्रकं त-
तो गत्वा बहिर्देशं कंदमूलकृताशनः अश्वत्थ
मूले सुष्वाप कालात्मा नाग आगमत् दष्टस्तु
दक्षिणे पादे पंचत्वमगमत्तदा ततो यमगणाः
क्रूराः पापिनां दंडदायकाः समागतास्तु तं नेतुं
तावच्छ्रीविष्णुपार्षदाः किरीटिनः कुंडलिनो हा-
रिणो वनमालिनः शंखचक्रगदापद्मस्रकशोभि-

तकरांबुजाः अपीच्य दर्शनास्तत्र समाजग्मुरनेक
शः यमदूतान्विनिर्भर्त्स्य निर्भया ऊचिरे द्विजाःभो
दूता यमराजस्य यूयं ज्ञानविवर्जिताः धर्मान् भा-
गवतान् शुद्धान्सज्ञास्पथ शुभावहान् अतो भवं-
तो गच्छतु यमराजस्य धामनि धर्मराजमथो ब्रू-
तअस्माकं वचनं भद्राः अयं विप्रो दुराचारो वेश्या-
दिनिरतोपि च स्नानसंध्यादिहीनोपि नरकार्होऽ-
पि सर्वथा अज्ञानादस्य भाले तु हरेर्भुक्तं सुकुं-
कुमं शुभोर्ध्वपुंड्रतां यातं तेनायं वैष्णवो ह्य भूत्
नास्य भक्तिर्हरौ नैव प्रसादोपरिभावना स्वेच्छ-
या लापितं तेन ऊर्ध्वपुंड्रमभूदयं वैष्णवो नात्र सं-
देहो भगवद्गंधधारणात् अतोऽयं वैष्णवे लोके गं-
ता नष्टास्तु दुष्क्रियाः एतस्य पातकं नास्ति सत्यं
सत्यं न संशयः अज्ञानाद्वह्नि संस्पर्शोपाददाहाय
युज्यते एवं कृष्णस्य संबंधो दोषनाशाय युज्यते
तस्मात्त्वदीयनगरीं न गंता विष्णुशासनात् धर्मज्ञ
धर्मराजोसि सर्वं जानासि सुव्रत इति ब्रुवंतु ग-
च्छंतु धर्मराजं वचो हि नः इत्युक्त्वा ते द्विजाःस-
र्वे किंकिणीजालंमालिनि शतघंटासमायुक्ते स्फु-
रत्स्फुरत्सुंदरे नानामौक्तिकजालादिवितानैरुपशो-
भिते रत्नादिरवचिते सर्वशोभनैकनिकेतने न तं
कृतघ्नाः पश्यंति न नृशंशा न नास्तिकाः न पापि-
नो दुराचारा विमुखा ये परे हरौ तस्मिन्विमाने सं-

स्थाप्य तं विमं सुरपूजितं नानाप्सरोगणैर्जुष्टं-
दिव्यमाल्यैः सुशोभितं पीतवस्त्रं चतुर्बाहुं श्यामं क-
मललोचनं शंखचक्रादिललितं केयूरादिविभूषितं
किरीटिनं कुंडलिनं हारिणं वनमालिनं निन्युर्वैकुंठ
भवने श्रीहरेश्वरणांतिकं अथ ते यमराजस्य दू-
ता यमनिकेतने गत्वा तु धर्मराजेंद्रं विस्तरात्सर्व-
मूचिरे यमराजस्तु तं वृत्तं श्रुत्वोत्कलितमानसः
दूतान्प्रति शुभैर्वाक्यैरुवाच सदसि स्थितः यम उवा-
च यस्य भाले भगवतः प्रसादं कुंकुमं शुभं ते
वै भागवता ज्ञेया नात्र नेया ममांतिकं उर्द्ध्वपुंड्र
धरा ये वै श्रीकृष्णाश्रयवर्तिनः श्रीकृष्णनामनि-
रतास्तद्ध्वंधांकितदेहिनः ऊर्द्ध्वपुंड्रं ललाटे तु कौं-
कुमं शोणरोचिषं मध्ये गोपीजनात्पश्चाद्वल्लभा-
येति श्रीयुजे मृदांचितं वैष्णवास्ते नात्र नेया भ-
मांतिकं चक्रादिचिह्ननिरता दारुमालालसद्गलाः
उरःपर्यंतमालाभिः शोभिताः कृष्णसेवकाः नात्र
नेया भवद्भिस्ते वैष्णवा भक्तितत्पराः श्रीकृष्ण-
सेवनपरास्तन्मंदिरसुमार्जकाः तदर्पितमनोबुद्धि-
कायवाक्सत्क्रियाः शुभाः निजाचार्यसुसेवायां त-
त्परास्तस्य किंकराः शीतोष्णादिषु कृष्णस्य सुख-
सेवारतास्तु ये अज्ञानादथवा ज्ञानाद्ये हि सर्व
निवेदिनः श्रीकृष्णशरणा ये वै ते नानेयाः कदा-
चन जन्मोत्सवादिनिरता हरिसेवनतत्पराः लोक

सन्मानरहितास्सर्वत्रसमबुद्धयः शुद्धाद्वैतैकसन्निष्ठा
भगवच्चिह्नधारकाः भक्तसन्मानकरणे समुद्युक्तास्तु
ये जनाः जीवेषु निजपुत्रास्सदारवत्स्नेहतत्पराः भग-
वत्संगिसंबद्धास्ते नानेयाः कदाचन बहुना किमिहोक्ते
न शृणुध्वं दूतसत्तमाः भक्तानां श्रीहरेर्यत्र सदाभा-
सोपि दृश्यते ते नानेया भवद्भिस्तु मदीयाज्ञानुवर्त्ति
भिः इत्युक्त्वा यमराजेन तुष्टुवुर्भगवद्गुणान् ब्रह्मो-
वाच एवं पुंड्रस्य माहात्म्यं दृष्ट्वा दूता यमस्य वै पर-
माश्चर्यतामापुः शशंसुर्वैष्णवान् गुणान् तस्मात्सर्व
प्रयत्नेन भगवद्गंधधारिणा भगवद्भुक्तगंधेन पीते
नाथोरुणेन च कुंकुमेन चरेद्धीमान्पुंड्राणि द्वाद-
शैव तु दंडाकारं ललाटे स्यात्पद्माकारं तु वक्षसि
वेणुपत्रनिभं बाव्होरन्यद्दीपाकृतिर्भवेत् आरभ्य
नासिकामूलं ब्रह्मरंध्रांत एव हि समारभ्य भ्रुवो-
र्मूलं सांतरालं प्रकल्पयेत् दशांगुलप्रमाणं तदुत्त-
मोत्तममुच्यते नवांगुलं मध्यमं स्यादष्टांगुलमतः
परं सप्तषट्पंचभिः पुंड्रं मध्यमं परिकीर्त्तितं चतु-
स्त्रिद्व्यंगुलैः पुंड्रं कनिष्ठं त्रिविधं स्मृतं सांतरालं
चोर्द्ध्वपुंड्रं सच्छिद्रं रचयेद्बुधः परिमाहोंगुलमितो र-
चयेत्तस्य निश्चितं ललाटे केशवं विद्यान्नारायण
मथोदरे माधवं हृदि विन्यस्य गोविंदं कंठदेशके
उदरे दक्षिणे पार्श्वे विष्णुरित्येव निश्चितं तत्पा-
र्श्वबाहुमध्ये तु मधुसूदनमेव च त्रिविक्रमं कर्णे

मूले वामनं वामपार्श्वके श्रीधरं वामबाहौ तु हृषी-
केशं सुकर्णयोः पृष्ठे तु पद्मनाभं वै ककुद्दामोद-
रं न्यसेत् तत्प्रक्षालनतोयेन वासुदेवं तु मूर्द्धनि अ-
था ऽदीक्षितानां साधारणधर्मान् ऊर्द्ध्वपुंड्रं द्विजातीनां
क्षत्रियाणां त्रिपुंड्रकं अर्द्धचंद्रं तु वैश्यानां वर्तुलं शू-
द्रजातिषु वैष्णवा यदि ते वर्णाः क्षत्रियाद्या भवंति
हि ऊर्द्ध्वपुंड्रं तु कुर्युस्ते नैव तिर्यक्कदाचन तिर्यक्
पुंड्रं न कुर्वीत संप्राप्ते मरणे पि च तिर्यक्पुंड्रधरो वि-
प्रः सर्वधर्मविवर्जितः तिर्यक्पुंड्रं यस्य भाले विप्रस्य
च सुदृश्यते तं दृष्ट्वाप्यथवा स्पृष्ट्वा सचैलं स्नानमाचरे-
त् तिर्यक्पुंड्रधरो यस्तु भस्मधारी च यो द्विजः सर्व-
धर्मसमायुक्तो न सभाष्यः कदाचन तस्माद्विप्रः प्रय-
त्नेन न कुर्यात्तिर्यपुंड्रकं ऊर्द्ध्वपुंड्रं चरेद्धीमान् श्रीह-
रेः प्रीतये द्विजाः तिर्यक्पुंड्रं लिपीकृत्य यस्तु सेवां समा-
चरेत् वृथैव सेवनं तस्य नरकं प्रतिपद्यते ब्राह्मणः कु-
लजो विद्वान् भस्मधारी भवेद्यदि वर्जयेत्तादृशं विप्रं
मद्योच्छिष्टं यथा घटं भस्मधारी यस्तु विप्रः श्वपचाद-
धमः स्मृतः निंदितः सर्वकार्येषु श्राद्धादिषु न संशयः
आदर्शे सुविलोक्याथो ऊर्द्ध्वपुंड्रं चरेद्द्विजाः तदभावे
जलेनापि तिलकं रचयेत्सुधीः दर्पणादि विनायस्तु कु-
र्याद्भाले सुपुंड्रकं तस्य पुंड्रं निरर्थं स्याद्धरिस्तस्य न तु-
ष्यति वर्तुलं दीर्घमेवात्र तिर्यक् ह्रस्वं तनुं ततं वक्र
विरूपं वद्धाग्रमतिदीर्घतरं तु यत् छिन्नमूलं रूक्ष

वर्णमासक्तं पूतिगंधि यत् अशुद्धमविषद्यं च तथा नांगुलिकल्पितं एवंविधं चोर्ध्वपुंड्रमनर्थकमथो द्विजाः त्यक्ता पुंड्रं चरेद्धीमान् नासादि ब्रह्मरंध्रकं मूले सिंहासनं कुर्यात्पद्मं तस्योपरि न्यसेत् श्रीगोपीजन पूर्वं तु वल्लभायेति मुद्रिकाम् ऊर्ध्वपुंड्रस्य मध्ये तु धारयेद्गोपिकामृदा चक्रादिकं ततो धार्यं ततस्सेवां समाचरेत् एवं ते चोर्ध्वपुंड्रस्य विधानं तु मयोदितं वैष्णवानां हितार्थाय भवत्प्रभाभ्यनुज्ञया किमन्यच्छ्रवणे श्रद्धा तद्वक्तव्यं द्विजात्मजाः यूयं धन्यतमा लोके येषां तु मतिरीदृशी। इति बृहद्वामनपुराणोर्ध्वपुंड्राध्यायसंग्रहः। एवं च भगवत्प्रसादकुंकुमादिनोर्ध्वपुंड्रधारणस्य वैदिकवैष्णवानामवश्यं कर्तव्यत्वे सिद्धे गोपीचंदनस्य पूर्वोदाहृतवचनेन चाभ्यंगकालादिषु निषिद्धत्वेनानित्यतया विशेषतस्तत्समुद्राधारिपरतया च नास्माकं प्रतिबंध इति दिक्॥ न च गोपीचंदनधारणस्यानित्यत्वेनस्वमार्गेपि गोपीचंदनादिमृदा श्रीगोपीजनवल्लभायेति शंखचक्रमुद्राधारणस्यावश्यकत्वेनै तद्धारणस्यानित्यत्वमापद्येत इति वाच्यं न धार्यं गोपिचंदनमिति वचनस्य प्राधान्यतो न धार्यमित्यर्थाददोषः किंच ऊर्ध्वपुंड्रार्थं गोपीचंदनादीतरद्रव्याणामुक्तत्वेन मुद्राधारणार्थं केवलं गोपीचंदनादिमृदामेवोक्तत्वेन नित्यत्वान्निषेध ऊर्ध्वपुंड्रार्थ गोपीचंदनमात्रधारणे पर्यवसन्न इति भाति। शिष्टास्तु उत्सवादिषु कुंकुमा-

दिमिश्रित गोपीचंदनादिना मुद्रादिधारणं विदधत इति न कोऽपि दोषः साधूनां समयश्चापि प्रमाणं वेदवद्भवेदिति स्मृतेस्तथैवाचरणीयमिति दिक्॥ ननु स्वमते दंडाकारं ललाटे स्यादित्यादिवचसोर्द्ध्वपुंड्रस्य दंडाकारस्य धारणमुदितं आचारमाधवादौ तु आकारांतरमपि स्मर्यते वर्त्तिदीपाकृतिं वापि वेणुपत्राकृतिं तथा पद्मस्य मुकुलाकारं तथैव कुमुदस्य च मत्स्यकूर्माकृतिं वापि शंखाकारमतः परमिति कथं दंडाकारस्यैव धारणमिति चेदुच्यते अश्वत्थपत्रसंकाशो वेणुपत्रसमाकृतिः पद्मकुड्मलसंकाशो मोहनं त्रितयं स्मृतं महाभागवतः शुद्धः पुंड्रं हरिपदाकृतिं दंडाकारं तु वा देवि धारयेदूर्द्ध्वपुंड्रकमिति पाद्मवचसा अश्वत्थपत्राकारादीनां सकामत्वेन महाभागवतस्य हरिपदाकृतेर्दंडाकृतेर्वोर्द्ध्वपुंड्रस्योदितत्वेन च मत्स्यकूर्माकृती नामपि व्यवच्छेदस्य भासमानतया पूर्वात्परवलीयस्त्वमिति न्यायाच्च दंडाकारस्यैव सिद्धेः श्रीपुरुषोत्तमचरणास्तु उपरि विस्तीर्णत्वे पदाकृतिं समत्वे दंडाकृतिं ज्ञेयमित्याहुः। अत्रायं भावो भाति ऊर्द्ध्वपुंड्रे भावद्वयं भगवच्चरणस्य भगवन्मंदिरस्य च एकांतिनो महाभागाः सर्वभूतहिते रताः सांतरालं प्रकुर्वंति पुंड्रं हरिपदाकृतिं ऊर्द्ध्वपुंड्रमृजुं सौम्यं सुपार्श्वं सुमनोहरं दंडाकारं सुशोभाढ्यं मध्ये छिद्रं प्रकल्पयेत् ऊर्द्ध्वपुंड्रस्य मध्ये तु विशाले सुमनोहरे सांतराले

समासीनो हरिस्तत्र श्रिया सह निरंतरालं यः कुर्या दूर्द्ध्वपुंड्रं द्विजाधमः स हि तत्र स्थितं विष्णुं श्रियं चैव व्यपोहतीति पद्मपुराणे श्रीसहितहरेः स्थिते रुक्तत्वेन स्थितेश्च मंदिर एव उक्तत्वेन सांतरालं प्रकुर्वीत पुंड्रं हरिपदाकृतिं मध्ये छिद्रेण संयुक्तं तद्धिद्धि हरिमंदिरमिति स्कांदेन केचित्तु नासामूलं समारभ्य ललाटांतं लिखेन्मृदा मध्ये छिद्रं प्रकर्तव्यं तच्छिद्रं हरिमंदिरमिति पाद्मवचनेन चास्योर्द्ध्वपुंड्रस्य हरिमंदिरत्वं निर्वाधमिति किं चास्मिन्पुराणे हरिपदाकृतिं धारयंतीत्युक्त्या हरिपदाकृतिधारणे विधेरभावेन पूर्वमाकारांतरस्योक्तत्वेपि यद्दडाकारं सुशोभाढ्यं मध्ये छिद्रं प्रकल्पयेदिति विधिबोधितत्वेन दंडाकारस्य पूर्वोक्तन्यायेन च दंडाकारधारणस्यैव सिद्धेः। दंडाकारमित्यत्र दंडाकारं कल्पयेन्मध्ये छिद्रं च कल्पयेदित्यर्थः। विनापि चं समुच्चयो भवतीति महाभाष्यात् यद्वा वर्तिदीपाकृतिमित्यारभ्योर्द्ध्वपुंड्रधारणं यदुक्तं तत्र स्थानादेरनुक्ततया दंडाकारं ललाटे स्यात्पद्माकारं तु वक्षसि वंशपत्रनिभं बाह्वोरन्यद्दीपाकृतिर्भवेदिति पाद्मबृहद्वामनवचनं स्थानविशेषनियमनार्थं श्रीमदाचार्यचरणैर्निर्बंधे उक्तमिति ज्ञेयमतो न पूर्वश्लोकैर्विरोधः। यच्च निंबार्काचार्यहरिवंशव्यासादिभिः पौराणिकं नासामूलं स्वग्रंथे पुराणवाक्येनांगीकृत्य तृतीयो नासिकाभागो नासामूलं प्रचक्षत इति पाद्म

वचनेन नासाग्रं नासामूलमंगीकृत्य गोपीचंदनादि
मृद्रचित दंडाकारोर्द्ध्वपुंड्रमध्ये भ्रुवोरन्तराले श्याम
बिंदु शुभ्रबिंदु वा धारणीयमिति निश्चयार्थं बिं
दुधारणवचांसि निरूपितानि तानि तादृशनासामूल
निरूपणप्रकरणे निरूपितानि न तु दंडाकारं ललाटे
स्यादित्यादिप्रकरणे भगवदुपभुक्तकुंकुमाद्यूर्द्ध्वपुं
ड्रधारणप्रकरणे निरूपितानीति नास्माकं बाधः अ
त्र तु योगरूढिरेव नासामूलशब्द इति दिक्। एवं
भगवदुपभुक्त कुंकुमादिनोर्द्ध्वपुंड्रधारणं वैष्णवधर्म
त्वेन कर्त्तव्यं पूर्णाः पुलिंद्येत्यादि श्लोकोक्तभगवच्च
रणसंबंधिकुंकुमधारणस्य भगवत्प्रापकत्वेनसिद्धेः श्रीम
दाचार्याणां श्रीपूर्णपुरुषोत्तमत्वेन तदीयचरणकुंकु
मेन दंडाकारोर्द्ध्वपुंड्रधारणं वैष्णवानामावश्यकमत
त्रभवद्रागसूचकारुणिमसमुल्लसतीति एवं च वै
ष्णवानां दंडाकारोर्द्ध्वपुंड्रेण या विराजते तस्यै श्री
मदाचार्यचरणाबुरजोरुचे नम इति सुष्ठूक्तं मंग
लाचरणश्लोक इति मंजुलमविकलं चाखिलम्॥
इति श्रीवल्लभाचार्य श्रीमत्प्रभुपदाब्जयोः दा-
सस्तदीय दासानामुपकाराय निर्ममे॥१॥ऊर्द्ध्वपुंड्रस्य
मार्तंडं श्रीमद्गिरिधरः सुधीः श्रीमदाचार्यचरणे
समर्पयदिमं शुभम् ॥ ॥ इतिश्रीमत्प्रभुचर-
णात्मजमहाराजश्रीयदुनाथकुलकमलदिवाकरगो-
स्वामिगोपालात्मजगिरिधरविरचितोर्द्ध्वपुंड्रमार्तंडोदेदीप्यत

BOMBAY CITY PRESS.

| नाम | की. रु. आ. पै. |
| --- | --- |
| गोपाळसहस्त्रनाम सादा | ०–२–० |
| गोपालसहस्त्रनाम हिन्दीटिकोपेतम् .... .... | ०–८–० |
| गौतमीय तंत्रम् .... | १–०–० |
| तत्वदीप निबंध: .... | ४–४–० |
| द्रव्यशुद्धि: व्रजभाषा तथा गूर्जरभाषा टीका सहितम् .... .... | १–८–० |
| नारद पञ्चरात्रम् .... | २–०–० |
| नारद भक्तिसूत्रं तदीयसर्वस्वभाषाभाष्यसहितम् .... | ०–९–० |
| नारद भक्तिसूत्र गूर्जर टीकासहित .... .... | ०–१–६ |
| नारद भक्तिसूत्र महाराष्ट्र टीका .... .... | ०–१–० |
| भक्तिदर्शन. नारदसूत्र शांडिल्यसूत्र गूर्जरभाषासहित .... | ०–८–० |
| पुष्टिमार्गीयस्तोत्र रत्नाकर: ( ८१ स्तोत्राणिसन्ति ) | ०–६–० |
| उपरोक्त कौशेयबद्ध: रेशमी-गुटका .... .... | ०–८–० |
| पुष्टिमार्गीयस्तोत्राणि ( ३३ स्तोत्राणिसन्ति ).... | ०–४–० |
| पुष्टिमार्गीयस्तोत्राणि ( २४ स्तोत्राणिसन्ति ).... | ०–२–३ |

| नाम | की. रु. आ. पै. |
| --- | --- |
| पुष्टिमार्गीय षोडशग्रंथ: गूर्जर टीका सहित सादि-जील्द .... .... | ०–१२–० |
| ,, ,, .... | १–०–० |
| पुष्टिमार्गीय षोडशग्रंथ व्रजभाषाटीका .... | ०–१२–० |
| सएव व्रजभाषाविस्तृत टीकोपेता गो० ( नृसिंहलाल ) महाराज विरचित .... | २–०–० |
| पुरुषोत्तमसहस्त्रनाम मूल | ०–१–६ |
| तथा ( अष्टपेजी बुकसाईज ) .... .... | ०–२–६ |
| तथा ( गूर्जर भाषाटीकासहित .... .... | ०–८–० |
| पुष्टिमार्गीय गुरुपरंपरा निर्णय: .... .... | ०–२–० |
| बालकृष्ण चम्पू सटिक.... | १–८–० |
| भक्तिसूत्र वैजयन्ती ( शांडिल्यसूत्र भाषाटीकासहित | ०–४–६ |
| भगवद्गीता श्रीमद्वल्लभाचार्यप्रकटित तत्त्वदीपाख्यसहिता .... .... | ०–८–० |
| भगवद्गीता गुजरातीटीकासहित .... | ०–९–० |

| नाम | की. रु. आ. पै. |
|---|---|
| भगवद्गीता टीका अमृत तरङ्गिणी पुरुषोत्तमजी-कृत .... .... | २–०–० |
| मारुतशक्तिसहित प्राभञ्जन .... .... | ४–८–० |
| राधागोपाल पञ्चांग .... | ०–१२–० |
| अनेकार्थ मंजरी ( नंददास ) .... .... | ०–१–० |
| मानमंजरी .... .... | ०–१–० |
| नवरत्न रासविलास सचित्र .... .... | २–०–० |
| यमुना दर्पण .... .... | ०–१–६ |
| मथुराजीकी सभाको निर्णय टीपणी सहित .... | ०–२–० |
| श्रीमद्भागवतके षोडश धोळ श्रीमहाप्रभुजी गुसांईजी के पद आश्राके तथा विरहकेपद तथा सर्वोत्तमजीके नामके पद .... .... | १–२–० |

| नाम | की. रु. आ. पै. |
|---|---|
| मर्म सर्वस्व ( गुजराती ) | ०–४–० |
| रासपंचाध्यायी और भ्रमरगीत .... .... | ०–९–० |
| श्रीवल्लभाख्यान तथा मूल पुरुष दोहा, धोळ, गरबा, पद सूरपचिसी समेत गुजराती लिपि .... | ०–८–० |
| ,, ,, बालबोध-लिपि .... .... | ०–८–० |
| श्रीवल्लभाचार्य जीवनचरित्र ( गुजराती ) .... | ०–४–० |
| अष्टाक्षर विवरण ( टीका गुजराती ) .... | ०–६–० |
| श्रीगोकुलनाथजीकृत वचनामृत ( व्रजभाषा ) .... | ०–२–६ |
| श्रीगोवर्धननाथजीको प्रागट्य ( मथुरा ) .... | ०–३–० |
| श्रीगोवर्धननाथजीको प्रागट्य व्रजभाषा और गुजराती भाषानुवाद सहित .... | ०–८–० |

पुस्तक मिलनेका ठिकाना–

**ज्येष्ठाराम मुकुन्दजी,**

कालकादेवी रोड–रामवाडी–मुंबई.